International Journal of Sanskrit Research 2025; 11(1): 11-17

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2025; 11(1): 11-17
© 2025 IJSR
www.anantaajournal.com
Received: 15-10-2024
Accepted: 19-11-2024

**Dr. D Padmaja**
Assistant Professor of Sanskrit, Sri Venkateshwara Government Arts and Science College, Palem (A) Nagarkurnool, Begumpet, Hyderabad, Telangana, India

**Corresponding Author:**
**Dr. D Padmaja**
Assistant Professor of Sanskrit, Sri Venkateshwara Government Arts and Science College, Palem (A) Nagarkurnool, Begumpet, Hyderabad, Telangana, India

# मम्मटविश्वनाथयोः दिशा लक्षणाव्यापारविवेचनम्

**Dr. D Padmaja**

## प्रस्तावना

संस्कृतसाहित्यजगति नैकेषां काव्यानां महाकाव्यानां रचनाः समजयन्। काव्यनाटकादयः वाल्मीकिकालिदासादिभिः तैस्तैः प्रत्ययैः अलौकिकप्रतिभया च निर्मिताः अभूवन्। परन्तु तदनन्तरकाले सामान्यजनाः किं वा पन्थानमनुसृत्य काव्यनाटकादीनि निर्मातव्यानि इति प्रश्ने जाते अलंकारशास्त्रग्रन्थाश्रिताः इत्युत्तरं लभ्यते। भरतमुनिना विरचिते नाट्यशास्त्रे काव्यशास्त्रं उत अलङ्कारशास्त्रं षष्ठाध्याये रसादिनिरूपणावसरे मनाक् स्पृष्टं वर्तते। स एव विषयः अनन्तरकालिकैः आलङ्कारिकैः आनन्दवर्धनमम्मटभामहादिभिः तेषां सिद्धान्ताननुसृत्य विस्तरितः। ततः अलङ्कारशास्त्रं प्रादुर्भूतम्।

प्रसिद्धेष्वपि बहुषु आलङ्कारिकेषु मम्मटः विशिष्टस्थानं भजते। सः काव्यप्रकाशः इत्यालङ्कारिकग्रन्थं विलिख्य नैकेषां मार्गदर्शको बभूव। मम्मटः काश्मीरदेशवासीति विदुषां अभिमतं वर्तते। मम्मटस्य वैयक्तिकविशेषाः न प्राप्यन्ते। परन्तु भीमसेनः इति काव्यप्रकाशस्य व्याख्याकारः मम्मटः जय्यटस्य पुत्रः इति, एवञ्च कय्यटोव्वटौ अस्य भ्रातराविति वक्ति। कैय्यटः महाभाष्यव्याख्यां उव्वटः शुक्लयजुर्वेदसंहितायाः ऋक्प्रातिशाख्यायाश्च व्याख्यनमपि अकुरुतामिति ज्ञायते। मम्मटः काश्यां कृतविद्यः इति स एव तस्य भ्रात्रोः गुरुः इति प्रसिद्धिः लोके दृश्यते। नैषधीयचरित महाकाव्यरचयितुः श्रीहर्षस्य मातुलोऽयमित्यपि एका कथा श्रुता वर्तते।

मम्मटस्य कालनिर्णयेपि नैकाः विप्रतिपत्तयः दृश्यन्ते। मम्मटः तस्य काव्यप्रकाशाख्ये ग्रन्थे अभिवनगुप्तपादस्य सिद्धान्तान् निर्दिष्टवान्। अभिनवगुप्तः क्री. श 980 – 1020 कालीनः आसीदिति विदुषामाशयः। अतः मम्मटस्य अभिनवगुप्तस्य च प्रायः चत्वारिंशत् वर्षावधि यावत् अन्तरं भवेदिति ज्ञायते। एवञ्च स्वस्य काव्यप्रकाशे भोजस्य श्लोकमेकं उदाहृतवान्। भोजः क्री.श 1055 पर्यन्तं राज्यमपालयदिति प्रमाणमस्तीति हेतोः मम्मटः क्री.श 1050 समये ग्रन्थरचनामकरोदिति

विमर्शकानां अभिप्रायः। मम्मटः नैकशास्त्रपारङ्गतः इति काव्यप्रकाशस्य पठनेन अवगम्यते। व्याकरणपूर्वमीमांसोत्तरमींमांसासांख्यादिशास्त्रेषु बौद्धशैवसिद्धान्तेषु कृतपरिश्रमस्यास्य व्याकरणशास्त्रे महती इच्छा वर्तते इत्यनुमीयते। अनेन ग्रथितेषु ग्रन्थेषु काव्यप्रकाशः शब्दव्यापारपरिचयः इति द्वावेव ग्रन्थौ उपलभ्यमानौ वर्तेते।

**काव्यप्रकाशस्य वैशिष्ट्यम्**

अलङ्कारशास्त्रग्रन्थेषु काव्यप्रकाशः ग्रन्थराजः इति कथने नास्ति अतिशयोक्तिः। यतो हि अनेकाः विद्वांसः ग्रन्थस्यास्य व्याख्यामकार्षुः। आंग्ल , हिन्दी, गुजराती इत्यादिषु प्रान्तीयभाषासु ग्रन्थोऽयं सव्याख्यानं अनूदितः वर्तते। ग्रन्थोऽयं दशसु उल्लासेषु कारिकावृत्युदाहरणैः उल्लिखितः वर्तते। कारिकाः तथा वृत्तिश्च मम्मटेनैव उल्लिखिताः। उदाहरणश्लोकास्तावत् यथावसरं इतरेभ्यः ग्रन्थेभ्यः स्वीकृताः सन्ति। यद्यपि मम्मटः प्रत्येकतया कमपि सिद्धान्तं नाविश्चकार, तथापि अलङ्कारशास्त्रसम्बद्धाः विषयाः सर्वेपि एकत्र स्पष्टतया निरूपिताः वर्तन्ते। मधुमयभणतीनां मार्गदर्शी महर्षिः इति भोजोक्तप्रकारेण वाल्मीकिः यथा काव्यनिर्माणे मार्गदर्शी आसीत् तथा मम्मटोऽपि अलङ्कारशास्त्रग्रन्थरचनाप्रक्रियायाः पथदर्शको बभूवेति कथने नास्ति सन्देहलेशः।

**विश्वनाथविरचित साहित्यदर्पणस्य वैशिष्ट्यम्**

कविराजः विश्वनाथः उत्कलदेशवासी वैष्णवः आसीत्। अयं चतुर्दशशताब्दीयः इति विदुषामभिमतमस्ति। विश्वनाथः एवं स्वपिता चन्द्रशेखरश्च चतुर्दशभाषासु निपुणौ स्तः। द्वावपि सन्धिविग्रहिकमहापात्रा इत्युपाधिना विभूषितौ। विश्वनाथस्य प्रपितामहः नारायणः अलङ्कारशास्त्रपण्डितः आसीत्। विश्वनाथः साहित्यदर्पणमिति अलङ्कारग्रन्थं प्रणिनाय। प्राचीनालङ्कारिकेषु भरतभामहदण्ड्यानन्दवर्धनमम्मटादयः प्रमुखाः सन्ति। नवीनालङ्कारिकेषु विद्यानाथवाग्भटविश्वनाथजगन्नाथादयः प्रमुखस्थानं भजन्ते। साहित्यदर्पणे दशपरिच्छेदाः वर्तन्ते। काव्यप्रकाशे लक्षणायाः षट्भेदाः निरूपिताः। परन्तु साहित्यदर्पणे लक्षणायाः अशीतिभेदाः चमत्कारतया निरूपिताः वर्तन्ते। विश्वनाथः अर्वाचीनः इत्यस्मात् कारणात् सर्वेषां आलङ्कारिकविद्वद्वरेण्यानां ग्रन्थान् परिशील्य स्वसिद्धान्तान् स्पष्टतया साहित्यर्पणे न्यरूपयत्।

यद्यपि नैकाः आलङ्कारिकाः लक्षणायाः स्वरूपं भेदांश्च अधिकतया स्पष्टतया च न प्रत्यपादयन्। किन्तु मम्मटविश्वनाथौ लक्षणायाः स्वरूपभेदान् सिद्धान्ताननुरुन्ध्य विस्पष्टतया उपस्थापितवन्तौ। तान्येव अत्र प्रस्तूयन्ते।

**काव्यप्रकाशानुसारेण लक्षणाप्रभेदा**

द्वितीयोल्लासे शब्दार्थस्वरूपं निरूपयितुं उद्युक्तः मम्मटः आदौ वाचकवाच्यार्थाभिधास्वरूपान् निरूप्य, तदनु लक्ष्यकलक्ष्यार्थलक्षणादीनां शब्दार्थव्यापारान् विस्तरेण भेदसहितं न्यरूपयत्। तत्र लक्षणाव्यापारनिरूपणावसरे लक्षणा तेन षड्विधेति[1] - लक्षणा व्यापारस्य स्वरूपं , तद्भेदाश्च सविस्तरं न्यरुपयत्। काव्यप्रकाशस्य. प्रथमोल्लासः भारतीस्तुतिः काव्यप्रयोजनं, काव्यलक्षणं, काव्यहेतुः काव्यभेदादिभिः प्रपञ्चितः। द्वितीयोल्लासस्य आदावेव शब्दार्थयोः स्वरूपं निरूपयितुमुपक्रमते।

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।
वाच्यादयस्तदर्थाः स्युः तात्पर्यार्थोपि केषुचित्।। [2]

शब्दः त्रिविधः। वाचकः, लाक्षणिकः, व्यञ्जकश्चेति। अर्थोपि त्रिविधः – वाच्यः, लक्ष्यः, व्यङ्ग्यः। वाचकशब्दः अभिधाव्यापारेण वाच्यार्थं बोधयति। लक्ष्यकशब्दः लक्षणाव्यापारेण लक्ष्यार्थं बोधयति। व्यञ्जकशब्दः व्यञ्जनाव्यापारेण व्यङ्ग्यार्थं बोधयति। भाट्टमीमांसकमते तात्पर्यार्थोपि अङ्गीक्रियते। आकांक्षा, सन्निधिः, योग्यतेति अंशत्रयेण अन्वितः वाच्यार्थः अवगम्यते , तद्भिन्नः विशिष्टार्थः तात्पर्यार्थेन अवबुध्यतेति

अभिहितान्वयवादिनामाशयः। वाक्यार्थोपि वाच्यार्थैनैवावगम्यतेति अन्विताभिधानवादिनामाशयः वर्तते। एकस्मिन् वाक्ये विद्यमानानां पदानां मध्ये सम्बन्धः, समन्वयः कथं साध्यते इति प्रश्ने आकांक्षा योग्यता सन्निधिः इत्यादिभिः शाब्दबोधसहकारिकारणैः सिध्यतीति अवगम्यते। पदपदार्थज्ञानं व्यवहारेणैव ज्ञायते इति अन्विताभिवादिनः। गां आनय, गां नय, अश्वं आनय इत्यादि वाक्यप्रयोगैः या क्रिया प्रवर्तते तां क्रियां दृष्ट्वा तृतीयः पुरुषः शब्दानां आवापोद्वापाभ्यां प्रयोगोपसंहाराभ्यां तत्त्च्छब्दानां अर्थमवगच्छति। पदानि परस्परमन्वयं प्राप्नुवन्ति चेदपि एकैकस्मिन् वाक्ये अन्वयविशेषः भवति। तत् ज्ञातुं तात्पर्यशक्तिरावश्यकीति अभिहितान्वयवादिनः अभिप्रयन्ति। मम्मटोपि अमुमेव मतं समर्थयतीति तेनकृत अभिहितान्वयवादिनः इति बहुवचनशब्दप्रयोगेण व्यज्यतेति विदुषां अभिमतमस्ति। एवञ्च सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते [3] इत्यभिप्रयति मम्मटः। अर्थात् वाच्यलक्ष्यव्यञ्ज्यार्थाः सर्वेपि व्यञ्चकाः इत्येवेति मम्मटस्य वादः।

शब्दार्थभेदान् स्वरूपान् च निरूप्य मम्मटः व्यापारान्निरूपयति। स मुख्योऽर्थः तत्र मुख्यो व्यापारोऽस्य अभिधोत्युच्यते।[4] - शब्दश्रवणमात्रेणैव आदौ यः अर्थः स्फुर्यते सः अर्थः तच्छब्दस्य मुख्यार्थः। तदवबोधकः मुख्यव्यापारः अभिधा नाम्ना व्यवह्रियते।

लक्षणा व्यापारः - मुख्यार्थबाधे तद्योगे
रूढितोऽथप्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।। [5]

लक्षणा व्यापारमिति अपरं व्यापारं निरूपयति मम्मटः। मुख्यार्थबाधया मुख्यार्थसम्बन्धेन रूढ्या अथवा प्रयोजनेन च अन्यः अर्थः यया प्रतिपाद्यते सा वृत्तिः लक्षणा वृत्तिः। कर्मणि कुशलः इत्यत्र कुशलशब्दस्य कुशग्राही इत्यर्थः न घटते। कुशलशब्दस्य प्रवीणः इति रूढ्यर्थः। अत्र कुशग्राही इति शब्दः बाधितः। कुशलशब्दस्य कुशग्राही इति वाच्यार्थस्य प्रवीणः इति लक्ष्यार्थस्य च विवेचनाशक्तिरूपसम्बन्धः वर्तते। गङ्गायां घोषः इत्यत्र गङ्गाप्रवाहे घोषः इत्यर्थः न घटते। अतः गङ्गातीरे इत्यर्थः लक्ष्यते। प्रवाहरूपवाच्यार्थस्य तीररूप लक्ष्यार्थस्य च सामीप्यसम्बन्धः। शैत्यपावनत्वादयः प्रयोजनम्। अतः कर्मणि कुशलः इत्युदाहरणं रूढितः लक्षणायाः एवं गङ्गायां घोषः इति प्रयोजनात् लक्षणायाः उदाहरणे भवतः। लक्षणायां षट् भेदान् निरूपयन् आदौ भेदद्वयं निरूपयति।

लक्षणा स्थूलतया द्विविधा – शुद्धलक्षणा, गौणी लक्षणा। शुद्धलक्षणा पुनः उपादानलक्षणा एवं लक्षणलक्षणेति द्विधा। उपादानलक्षणा पुनः सारोपोपादानलक्षणा , साध्यवसानोपादानलक्षणेति द्विधा विभज्यते। सारोपलक्षणलक्षणा साध्यवसानलक्षणलक्षणा इति लक्षणलक्षणापि द्विविधा। एवं शुद्धलक्षणा चतुर्विधा। गौण्यां तु सारोपसाध्यावसानेति भेदौ सम्भवतः इत्याहत्य लक्षणायाः षट् प्रकाराः सम्भवन्ति। अत एव मम्मटः लक्षणा तेन षड्विधेति कारिकायां वदति। अत्यन्तविशकलितयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्तगनमुपचारः। अर्थात् – अत्यन्तसादृश्यमहिम्ना भिन्नपदार्थयोः अभेदत्वोपपादनं उपचारं भवति। उपचारयुक्ता लक्षणा गौणी , तद्भिन्ना शुद्धालक्षणा भवति।

**उपादानलक्षणलक्षणयोः लक्षणम्**

स्वसिद्धये पराक्षेपः परार्थं स्व समर्पणम्।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा।।[6]

शक्यार्थसाधने परार्थाक्षेपः यत्र भवति तत्र उपादानलक्षणा। परार्थनिरूपणाय स्वार्थसमर्पणं यत्र भवति तत्र लक्षणलक्षणा।

**सारोपसाध्यवसानलक्षणयोः लक्षणम्**

सारोपान्या तु यत्रोक्ता विषयी विषयस्तथा।
विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात्साध्यवसायिका।।[7]

आरोप्यमाणविषयिणः आरोप्यस्य विषयस्य च यत्रानपह्नवेन सामानाधिकरण्येण च प्रयोगः भवति चेत् तत्र सारोपलक्षणा। आरोपविषयः आरोप्यमाणविषयिणा निलीयते चेत् तत्र साध्यवसाना लक्षणा। पश्चात् लक्षणायाः षट् प्रभेदाः सोदाहरणपुरस्सरं इत्थं निरूपिताः सन्ति।

**शुद्धसारोपोदानलक्षणा**

मम्मटः स्वकाव्यप्रकाशे शुद्धसारोपोपादानलक्षणायाः उदाहरणं स्पष्टतया प्रतिपादितवान्। साहित्यदर्पणकारेण विश्वनाथेन एते कुन्ताः प्रविशन्तीत्युदाहरणं प्रदत्तम्। एते इति सर्वनामशब्देन कुन्तसंयोगिनः पुरुषाः आक्षिप्यन्ते। अतः तादात्म्यप्रतीतेः सारोपा। कुन्तादीनां अतिगहनत्वं अत्र प्रयोजनम्। विषयिणः कुन्त पदस्य , विषयस्य एतत्पदस्य च निर्देशात् सारोपा।

**शुद्धोपादानसाध्यवसानलक्षणा**

कुन्ताः प्रविशन्ति , यष्टयः प्रविशन्तीत्यादौ कुन्तादयः स्वप्रवेशक्रियारूपार्थसिध्यर्थं स्वसंयोगीन् पुरुषान् आक्षिप्यन्ते। स्वार्थसिद्धये कुन्तशब्दः अपरं पुरुषरूपार्थमाक्षिपतीति हेतोः उपादानलक्षणा। अत्र कुन्तानां पुरुषाणाञ्च संयोगसम्बन्दः सूचितः। सादृश्यादिसम्बन्धविरहात् उपचारविरहाच्च शुद्धा निर्दिष्टा। एवञ्च आरोपविषयेण कुन्तशब्देन आरोप्यमाण पुरुषशब्दः आच्छादितः इति हेतोः साध्यवसाना लक्षणा।

**शुद्धसारोपलक्षणलक्षणा**

शुद्धलक्षणलक्षणायाः गङ्गायां घोषः इत्त्युदाहरणं भवति। किन्तु सारोपभेदस्य आयुर्घुतमित्युदाहरणं दत्तं मम्मटेन। अत्र घृतमेव आयुर्वर्धकः इत्यर्थः लक्षणावृत्यावबुध्यते। अत्र कार्यकारणसम्बन्धः अस्तीति हेतोः सादृश्यभिन्नसम्बन्धाच्च शुद्धा। आयुर्वर्धकः घृतशब्दः इति प्रयोजनं लक्षयतीति लक्षणलक्षणा। घृतशब्दे आयुर्धायत्वमारोपितः। द्वावपि शब्दौ स्वशब्दवाच्यत्वात् सारूपा।

**शुद्धसाध्यवसानलक्षणलक्षणा**

आयुरेवेदं इति अस्याः लक्षणायाः उदाहरणं भवति। अत्र प्रयोजनमूलकत्वात् लक्षणलक्षणा घृतशब्दे आयुर्दायत्वं अध्यवसितमिति हेतोः साध्यवसानलक्षणा अत्र उपपादिता। कार्यकारणभावजन्यत्वादुपचारविरहात् शुद्धा।

**गौणसारोपलक्षणा**

गौर्वाहीकः इत्यस्मिन्नुदाहरणे जाड्यमान्ध्यादिगुणयुक्तः वाहीकः इति गवि विद्यमानगुणैः वाहीकः उपमितः। सादृश्यसम्बन्धेन जाड्यादिगुणविशिष्टः वाहीकः इति लक्षणया अवगम्यते। गो शब्दस्य वाहीकशब्दस्य च स्वशब्दाभिधेयत्वमस्तीति हेतोः सारोपलक्षणा। एवं इदं गौणसारोपलक्षणायाः उदाहरणं भवति।

**गौणसाध्यवसानलक्षणा**

गौरयमिति गौणसाध्यवसानलक्षणायाः उदाहरणं भवति। अत्र आरोपविषयः वाहीकः। वाहीकः गोशब्देन निगीर्णः इत्यनेन कारणेन साध्यवसाना भवति। अत्रापि जाड्यमान्ध्यादिगुणवदभिन्नः वाहीकः इति शाब्दबोधः लक्षणया जायते। गोशब्दे वाहीकशब्दः अध्यवसितः इति अध्यवसानः।
एवञ्च सादृश्येतरसम्बन्धेन कार्यकारणभावमूलकलक्षणायाः आयुर्घुतमित्युदाहरणं दत्तम्। तादर्थ्या दिसम्बन्धेनापि गौणलक्षणायाः अन्यान्युदाहरणानि प्रस्तौति मम्म्टः। ते च इन्द्रार्थाः स्थूणाः इन्द्रः इन्द्रपूजार्थं स्थापितः स्तम्भः इन्द्रः, राजकीयः पुरुषो राजेत्यत्र स्वस्वामिभावात् , अतक्षाः तक्षाः इत्यत्र तात्कार्याच्च सादृश्येतरसम्बन्धेन गौणी लक्षणा सिध्यति।

| मम्मटस्य दिशा लक्षणायाः भेदाः | | | | | |
|---|---|---|---|---|---|
| शुद्धा | | | | गौणी | |
| उपादानलक्षणा | | लक्षणलक्षणा | | सारोप | साध्यवसाना |
| 1. सारोपोपादानलक्षणा | 2. साध्यवसानोपादानलक्षणा | 3. सारोपलक्षणलक्षणा | 4. साध्यवसानलक्षणलक्षणा | उदा – गौर्वाहीकः। | उदा – गौरयम्। |
| उदा- एते कुन्ताः प्रविशन्ति। | उदा - कुन्ताः प्रविशन्ति, यष्टयः प्रविशन्ति। | उदा – आयुर्घुतम्। | उदा – आयुरेवेदम्। | | |

| विश्वनाथस्य दिशा लक्षणायाः मुख्यप्रभेदाः | | | | |
|---|---|---|---|---|
| क्र. सं | शुद्धा रूढिमती | शुद्धा प्रयोजनवती | गौणी रूढिमती | गौणी प्रयोजनवती |
| 1. | उपादानलक्षणा सारोपा – अश्वः श्वेतो धावति। | उपादानलक्षणा सारोपा – एते कुन्ताः प्रविशन्ति। | उपदानलक्षणा सारोपा – एतानि तैलानि हेमन्ते सुखानि। | उपादानलक्षणा सारोपा - एते राजकुमाराः गच्छन्ति। |
| 2. | उपादानलक्षणा साध्यवसाना – श्वेतो धावति। | उपादानलक्षणा साध्यवसाना – कुन्ताः प्रविशन्ति। | उपादानलक्षणा साध्यवसाना – तैलानि हेमन्ते सुखानि | उपादानलक्षणा साध्यवसाना – राजकुमाराः गच्छन्ति। |
| 3. | लक्षणलक्षणा सारोपा – कलिङ्गः पुरुषो युध्यते। | लक्षणलक्षणा सारोपा - आयुर्घुतम्। | लक्षणलक्षणा सारोपा – राजा गौरेन्द्रं कण्टकं शोधयति। | लक्षणलक्षणा सारोपा – गौर्वाहीकः। |
| 4. | लक्षणलक्षणा साध्यवसाना – कलिङ्गः साहसिकः। | लक्षणलक्षणा साध्यवसाना – गङ्गायां घोषः। | लक्षणलक्षणा साध्यवसाना – राजा कण्टकं शोधयति। | लक्षणलक्षणा साध्यवसाना – गौर्जल्पति। |

विश्वनाथः साहित्यदर्पणे लक्षणायाः अशीति प्रभेदान् प्रतिपादितवान्। अत्र तेन कृत रूढि प्रयोजनमूलकलक्षणा प्रभेदाः सोदाहरणाः विव्रियन्ते। विश्वनाथमतानुसारेण लक्षणाव्यापारस्य लक्षणमित्थं वर्तते - मुख्यार्थबाधे तद्युक्तौ ययोन्यार्थः प्रतीयते। रूढेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता।।[8] इति। तथा च उपादानलक्षणा , लक्षणलक्षणायाः लक्षणे एवं निरूपितवान्।

**उपादानलक्षणा एवं लक्षणलक्षणा**

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा।।
अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये। उपलक्षणहेतुत्वादेषा लक्षणलक्षणा।। [9]

**रूढिमूलकलक्षणाप्रभेदा**

1. शुद्धा रूढिमती उपादानलक्षणा सारोपा – अश्वः श्वेतो धावतीत्युदाहरणं वर्तते। अत्र श्वेतशब्दः अश्वशब्दात् अनिगीर्णत्वात् सारोपा। एवं श्वेत शब्दः वाच्यार्थेन सह लक्ष्यार्थं अश्वमपि प्रतिपादयति। अतः उपादानलक्षणा सिद्धा।
2. शुद्धा रूढिमती उपादानलक्षणा साध्यवसाना - श्वेतो धावतीत्युदाहरणं वर्तते। उदाहरणेऽस्मिन् श्वेतशब्दः अश्वशब्दमाक्षिपतीत्यतः उपादानलक्षणा प्राप्ता। एवं अश्वशब्दस्यानुपात्तत्वात् साध्यवसाना फलिता।
3. शुद्धा रूढिमती लक्षणलक्षणा सारोपा - कलिङ्गः पुरुषो युध्यते इत्युदाहरणम्। अत्र कलिङ्गशब्दः देशविशेषस्य परित्यागेन कलिङ्गदेशवासिनं पुरुषं निर्दिशति। कलिङ्गदेशपुरुषरूपार्थसिद्धये देशरूपार्थत्यागात्

लक्षणालक्षणा अत्र निरूपिता। द्वयोरपि अभेदत्वात् सारोपा सिद्धा वर्तते।

4. शुद्धा रूढिमती लक्षणलक्षणा साध्यवसाना - कलिङ्गः साहसिकः इत्युदाहरणम्। अत्र कलिङ्गशब्दः देशविशेषस्य परित्यागेन कलिङ्गदेशवासिनं पुरुषं निर्दिशति। पुरुषशब्दः अत्र निगीर्णः इति साध्यवसाना।
5. गौणी रूढिमती उपादानलक्षणा सारोपा - एतानि तैलानि हेमन्ते सुखानि इत्युदाहरणमत्र प्रतिपादितं वर्तते। अत्र तैलशब्दः स्नेहरूपमुख्यार्थं स्वीकृत्यैव सार्षपादिषु लक्ष्यार्थेष्वपि स्नेहरूपार्थं बोधयतीत्यतः उपादानलक्षणा। एतानि तैलानि शब्दोपात्तत्वेन सारोपा फलिता। सादृश्येतरसम्बन्धत्वात् गौणी सिद्धा।
6. गौणी रूढिमती उपादानलक्षणा साध्यवसाना - एतानि तैलानि हेमन्ते सुखानि इत्युदाहरणमत्र प्रतिपादितं वर्तते। अत्र तैल शब्दः स्नेहरूपमुख्यार्थं स्वीकृत्यैव सार्षपादिषु लक्ष्यार्थेष्वपि स्नेहरूपार्थं बोधयतीत्यतः उपादानलक्षणा। एतानि इति शब्दानुपात्तत्वेन साध्यवसाना। सादृश्येतरसम्बन्धत्वात् गौणी सिद्धा।
7. गौणी रूढिमती लक्षणलक्षणा सारोपा - राजा गौडेन्द्रं कण्ठकं शोषयतीत्युदाहरणमत्र सिद्धम्। दुःखदायित्वमिति सादृश्यसम्बन्धत्वात् अत्र गौणी वर्तते। कण्टक शब्दः शतृरूपार्थसिद्धये स्वार्थं परित्यजतीत्यतः लक्षणलणणा। गौडेन्द्रशब्दस्य आरोपविषयस्य प्रयोगात् सारोपा।
8. गौणी रूढिमती लक्षणलक्षणा साध्यवसाना - राजा गौडेन्द्रं कण्ठकं शोषयतीत्युदाहरणमत्र सिद्धम्। दुःखदायित्वमिति सादृश्यसम्बन्धत्वात् अत्र गौणी वर्तते। कण्टक शब्दः शतृरूपार्थसिद्धये स्वार्थं परित्यजतीत्यतीति लक्षणलणणा। गौडेन्द्रशब्दस्य आरोपविषयस्य निगरणात् साध्यवसाना।
9. शुद्धा प्रयोजनवती उपादानलक्षणा सारोपा - एते कुन्ताः प्रविशन्ति। एते इति सर्वनामशब्देन कुन्तसंयोगिनः पुरुषाः निर्दिश्यन्ते। अतः तादात्म्यप्रतीतेः सारोपा। कुन्तादीनां अतिगहनत्वं अत्र प्रयोजनम्। विषयिणः कुन्त पदस्य , विषयस्य एतत्पदस्य च निर्देशात् सारोपा।
10. शुद्धा प्रयोजनवती साध्यवसाना - कुन्ताः प्रविशन्ति इत्युदाहरणमत्र दत्तम्। कुन्तानां अचेतनत्वेन प्रवेशनक्रिया रूपमुख्यार्थबाधे कुन्तशब्देन स्वसंयोगिनः पुरुषाः आक्षिप्यन्ते। अत्र कुन्तादीनां अतिगहनत्वं प्रयोजनं वर्तते। पुरष शब्दस्य निगरणात् साध्यवसाना।
11. शुद्धा प्रयोजनवती लक्षणलक्षणा सारोपा - आयुर्घृतम् इत्युदाहरणम्। आयुष्कारणस्य घृतस्य आयोश्च कार्यकारणसम्बन्धेन अभेद प्रतीतिः वर्तते। जीवितकालवर्धकत्वमत्र प्रयोजनम्। विषयविषयिणोः निर्देशात् अत्र सारोपा दर्शिता।
12. शुद्धा प्रयोजनवती लक्षणलक्षणा साध्यवसाना - गङ्गायां घोषः इत्युदाहरणम्। अत्र गङ्गायां घोषस्याभावात् शैत्यपावनत्वादिप्रयोजन द्वारा गङ्गातीरे घोषः इत्यर्थः स्वीकार्यः। एवं सामीप्यसम्बन्धात् शुद्धा निरूपिता। तीर शब्दस्य बोधनाय गङ्गा शब्दः समर्पितः। आरोप्यमाणविषयस्य तीरशब्दस्य निगरणात् साध्यवसाना सिद्धा।
13. गौणी प्रयोजनवती उपादानलक्षणा सारोपा - अस्याः एते राजकुमाराः गच्छन्ति इत्युदाहरणं वर्तते। राजकुमारशब्देन राजकुमारसदृशेषु पुरुषेषु राजकुमारशब्दप्रयोगात् मुख्यार्थबाधः। शौर्यसौन्दर्यविशेषभूषणादिभिः सादृश्यसम्बन्धः प्रदर्शितः। राजकुमारवदारणीयत्वं अत्र प्रयोजनम्।
14. गौणी प्रयोजनवती उपादानलक्षणा साध्यवसाना - राजकुमाराः गच्छन्ति। राजकुमारशब्देन राजकुमारसदृशेषु पुरुषेषु राजकुमारशब्दप्रयोगात् मुख्यार्थबाधः। राजकुमारसदृशपुरुषान् राजकुमारशब्दं आक्षिपतीति उपादालक्षणा सिद्धा। विषयस्य निगरणात् साध्यवसाना।

15. गौणी प्रयोजनवती लक्षणलक्षणा सारोपा - गौर्वाहीकः इत्युदाहरणे वाहीक शब्दस्य गो शब्दस्य च अभेदप्रतिपादनं गो शब्दस्य मुख्यार्थबाधो जायते। गोशब्दस्य स्वार्थसमर्पणेन लक्षणलक्षणा। आरोपशब्दस्य वाहीकस्य उपपन्नत्वे सारोपा फलिता। जाड्यमान्द्यादिसादृश्यसम्बन्धात् गौणी। वाहीकस्य अतिशयजाड्यत्वबोधनमत्र प्रयोजनम्।
16. गौणी प्रयोजनवती साध्यवसाना - गौर्जल्पति इत्यस्मिन्नुदाहरणे जल्पनक्रियायाः गवि असम्भवात् मुख्यार्थबाधः वर्तते। गो शब्दः वाहीकरूपार्थप्रतिपादनाय समर्पितः। अतः लक्षणा सिद्धा। आरोप्यमाणेन गो पदेन आरोप विषयस्य वाहीकस्य निगरणात् साध्यवसाना विस्पष्टा। जाड्यमान्द्यादिसादृश्यसम्बन्धात् गौणी। वाहीकस्य जाड्याद्यतिशयबोधनमत्र प्रयोजनम्।

## उपसंहारः

एवं षट् प्रकारैः मम्मटेन प्रोक्ताः लक्षणाभेदाः तत्पश्चात् असीति (80) प्रभेदैः विश्वनाथेन प्रपञ्चिताः इति विदुषां वचः। प्रभेदैः प्रादुर्भूता लक्षणा ध्वनिकारः ध्वनिभेदेषु लक्षणामूलकध्वनिमपि उपस्थापितवान्। रूपकालङ्कारस्य अभेदप्रतीतिरिति प्रक्रियायाः मूलं लक्षणावृत्तेः सारोपभेदे अस्तीति केषाञ्चन विदुषामाशयः। यथा गौर्वाहीकः इति द्वयोर्विद्यमानगुणसाम्यादुक्तम्। गौणसारोपलक्षणायामेव रूपकस्पर्शः दृश्यते। आयुर्घृतमित्यादि शुद्धसारोपोदाहरणे सादृश्येतरकार्यकारणसम्बन्धेन लक्षणा निरूपिता। तत् केवलं वैचित्र्यमात्रं भवति, नत्वलङ्कारः। यतो हि दण्डि प्रभृतयः रूपकं सादृश्यमूलकमेवेति मन्यन्ते। अत एव दण्डिनोक्तम् यत् - उपमैव तिरोभूतभेदात् रूपकमुच्यते इति। एवं बहवः आलङ्कारिकाः स्वालङ्कारिकग्रन्थेषु शब्दव्यापारात्मकलक्षणावृत्तेः वैशिष्ट्यं विस्पष्टतया प्रत्यपादयन्।

## पदटिप्पणी

1. का. प्र - द्वि .उ, का – 12
2. का. प्र - द्वि .उ, का – 06
3. का. प्र - द्वि .उ, का – 07
4. का. प्र - द्वि .उ, का – 08
5. का. प्र - द्वि .उ, का – 09
6. का. प्र - द्वि .उ, का – 10
7. का. प्र - द्वि .उ, का – 11
8. सा.द - द्वि, प , का - 5
9. सा. द – द्वि ,प, का - 6

## उपयुक्तग्रन्थसूची


1. काव्यप्रकाशः - मम्मटः, भारतीयविद्याप्रकाशन, वारणासी 1993.
2. काव्यप्रकाशः – मम्म्टः, बालानन्दिनी व्याख्या, संस्कृतभाषाप्रचारसमितिः, जून् 2009
3. काव्यादर्शः – दण्डी , राष्ट्रियसंस्कृतसंस्थानम् , नवदेहली , 2000.
4. साहित्यदर्पणम् – चन्द्रकला व्याख्या सहिता, चौखाम्बा कृष्णदास अकादमी, वाराणसी 2016.
5. ध्वन्यालोकः - लोचनसहितबालानन्दीव्याख्या, श्री जयलक्ष्मी पब्लिकेशन् , हैदराबाद् 2007.
6. काव्यप्रकाशस्य शास्त्ररीत्या अभिवृद्धि, Research paper of Dr. Anupama Ryali, Sastra, Journal of University of Silicon Andhra, Vol – 05, 2023. (Article no 14.)